# Shri Sharada Devi Ashtakam

# श्रीशारदादेव्यष्टकम्

## Document Information

Text title : Shri Sharada Devi Ashtakam

File name : shAradAdevyaShTakam4.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Dinanathatripathi

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

Shri Sharada Devi Ashtakam

# श्रीशारदादेव्यष्टकम्

न याचे समृद्धिं न चानित्यमायु-
र्न रूपं न धर्मं यशो वा समित्रम् ।
अधर्मं न कार्यं न दैन्यं दिवं वा
मतिर्मे तु भूयात् पदे शारदायाः ॥ १॥

स्वदेशे विदेशे भव त्वं दयार्द्रा-
त्वनीचे सुनीचे समाना विधात्री ।
जले वा भुवि त्वं प्रजानां शरण्या
नमस्ते नमस्ते पदे शारदायाः ॥ २॥

अजस्रं यथा ते भजाम्यङ्घ्रि युग्मं
यथा नाम तेऽहं जपामि सचिन्त्यः ।
अपूर्वान् गुणांस्ते स्मरामि प्रहृष्ट-
स्तथा शारदा त्वं विधेहि प्रसन्ना ॥ ३॥

वृथैव प्रयाति क्षणं मे वरेण्ये !
त्विदानीं प्रबोधो न जातस्त्रिनेत्रे ! ।
यदा शारदा त्वं ममासि प्रपद्या
भयं किं यमात् स्यान्नमः शारदायै ॥ ४॥

अहो कः शुभोऽयं प्रवृत्तोऽस्ति कालो
यतः शारदाम्बागताऽस्यां धरित्र्याम् ।
विचिन्त्य नरास्तां लीलां पवित्रा
ममर्त्या भवन्त्वप्रमत्ता भवन्तः ॥ ५॥

यथा जानकी सा सरामा समर्च्या
ह्यसौ राधिका वा सकृष्णा नमस्या ।
सती सा सशम्भुर्यथाराधनीया
तथा शारदा मे सरामासकृष्णा ॥ ६॥

रविस्त्वं शशी त्वं त्वमिन्द्रो यमस्त्वं
    प्रचेतास्त्वमग्निर्विराङ्गत्मनास्याः ।
भयानां भयं त्वं करालापि काली
    धुनीते मनो मे कथं त्वाऽभिवन्दे ॥ ७॥

न कोऽप्यस्ति सत्यं मदीयो बिना त्वां
    विषाक्ते द्वितीये गतिर्यौ भवाब्धौ ।
असङ्ख्यानि जन्मानि सन्त्वम्बिके मे
    सदा चेत् स्मरामि त्वदीये पदाब्जे ॥ ८॥

वृथा शब्दं परित्यज्य वद जिह्वे निरन्तरम् ।
शारदे शारदे मातः जयानन्दमयीति च ॥

इति पं. श्रीदीनानाथत्रिपाठी काव्य-व्याकरण-न्याय-तर्क-साङ्ख्य-
    वेदान्ततीर्थ-विरचितं “श्रीश्रीशारदादेव्यष्टकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*